**हर्मन्** न० हृ+मनिन् । जृम्भणे (हाइतोला) शब्दरत्नावली ।

**हर्मित** त्रि० हर्मन्+तार० इतच् । १जातजृम्भणे शब्दर० २दग्धे ३ क्षिप्ते च मेदि० ।

**हर्म्य** न० हृ-यत् सुट् च । १इष्टकाकाष्ठादिरचिते धनिनां गृहभेदे अमरः “रम्यं हर्म्यतलम्” इति प्रबोध० ।

**हर्य्य** क्लमे अक० गतौ सक० भ्वा० पर० सेट् । हर्य्यति अहर्य्यीत् । [अमरः । स्त्रियां ङीप् २कुबेरे च जटा० ।

**हर्य्यक्ष** पुंस्त्री० हरि पिङ्गलमक्षि यस्य षच्समा० । १सिंहे

**हर्य्यश्व** पु० हरिनामा हरिवर्णो वाऽश्वोऽस्य । इन्द्रे ।

**हर्ष** पु० हृष-घञ् । १सुखे अमरः २इष्टाधिगमजन्यानन्दे । ३कन्दर्पपितरि “पुलस्त्य उवाच । “कन्दर्पो हर्षतनयो योऽसौ कामो निगद्यते । स शङ्करेण संदग्धो ह्यनङ्गत्वमुपागतः” । वामनपु० ५ अ० । ४कलियुगीयनृपभेदे हर्षचरिते तत्कथा दृश्या । [शब्दमा० ।

**हर्षक** त्रि० हृष-णिच् ण्वुल् । १हर्षकारके । २पर्वतविशेषे

**हर्षण** पु० हर्षयति अभीष्टदानात् हृष-णिच्-ल्यु । १विष्कम्भादिमध्ये चतुर्दशे योगे ज्यो० । २हर्षकारके त्रि० । ३नेत्ररोगभेदे ४श्राद्धभेदे ५श्राद्धदेवभेदे पु० शब्दच० । हृष-भावे ल्युट् । ६हर्षे न० ।

**हर्षपद** न० ६त० । नील० ताजकोक्ते ग्रहविशेषस्य लग्नादिस्थानभेदे । यथोक्तम् “नन्दत्रिषड्लग्नभवत्र्युपत्र्यया इलाद्हर्षपदं स्वभोक्तम् । त्रिभं त्रिभं लग्नभतः क्रमेण स्त्रीणां नृणां रात्रिदिनेषु तेषु” । हर्षस्थानादयोऽप्यत्र । “न हर्षस्थानमाश्रितः” नीलक० ।

**हर्षमाण** पु० हृष-ताच्छील्ये चानश् । हृष्टचित्ते अमरः ।

**हर्षयित्नु** पु० हृष् णिच्-इत्नु । १पुत्रे २स्वर्णे न० मेदि० । ३हर्षणशीले त्रि० । [२हर्षकारके ॰ ।

**हर्षिणी** स्त्री हृष-णिच्-णिनि ङीप् । १विजयायाम्

**हर्षित** त्रि० हर्षो जातोऽस्य इतच् । १जातानन्दे । २हर्षस्थानगते ग्रहे च ।

**हर्षुल** पुंस्त्री० हृष+उलच् । १मृगे स्त्रियां ङीष् । २कामुके त्रि० सि० कौ० । ३हर्षणशीले त्रि० । [लादि० हलः हालः

**हल** विलेखे भ्वा० पर० सक० सेट् । हलति अहालीत् अ-

**हल** न० हल्यते कृष्यतेऽनेन हल-घञर्थे करणे क । लाङ्गले अमरः । कृषिशब्दे २१९८पृ० दृश्यम् ।

**हलदी** स्त्री हल-शत्रु-हलनं कर्षकमपि दायति शोधयति दै-क गौरा० ङीष् । हरिद्रायाम् राजनि० ।

**हलधर** पु० हलं धरति आयुधत्वेन कृषिसाधनत्वेन वा धृ-अच् । १बलरामे शब्दर० । २कर्षके त्रि० “उन्मूलिता हलधरेण पदाभिघातैः” उद्भटः ।

**हलभूति** स्त्री हलेन हलसाध्या भूतिः । कृषिवृत्तौ शब्दर०

**हलभृत्** पु० हलं बिभर्त्ति भृ-क्विप् । १बलदेवे त्रिकाण्ड० २लाङ्गलधारके च । [३कृषिकार्य्ये च ।

**हलभृति** पु० उपवर्षे १मुनिभेदे त्रिका० । २हलस्य धारणे

**हला** अव्य० हेति लीयते ला-क । नाट्योक्तौ १सखीसम्बोधने अमरः । २सख्यां जटा० ३पृथिव्यां स्त्री ४जले च स्त्री अजयपालः ।

**हलायुध** पु० हलेन आयुध्यति आ+युध क । १बलदेवे अमरः २ब्राह्मणसर्वस्वादिग्रन्थकारके विद्वद्भेदे च ।

**हलाह** पुंस्त्री० । चित्रिताश्वे हेमच० स्त्रियां ङीष् ।

**हलाहल** पु० हलेनेव आहलति विलिखति आ+हल-अच् । १विषभेदे २ब्रह्मसर्पे ३अञ्जनायां मेदि० । ४बुद्धभेदे त्रिका० ।

**हलि** पु० हल-इन् । इहद्धले शब्दर० ।

**हलिन्** पु० हलोऽस्त्यस्यायुधत्वेन कृषिसाधनत्वेन वा इनि । १बलरामे अमरः २कर्षके त्रि० । हलस्य आकारो विद्यते यस्या ङीप् हलिनी (विषलाङ्गला) ३लाङ्गलीवृक्षे रत्नमा० इनि । हलानां समूहः ङीप् ४हलसमूहे स्त्री । [राजनि० ।

**हलिप्रिय** पु० ६त० । १कदम्बवृक्षे अमरः । २मदिरायां स्त्री

**हली** स्त्री हल-इन् ङीप् । कलिकारीवृक्षे राजनि० ।

**हलीन** पु० हलाय हितः ख । शाकवृक्षे (शेगुन) शब्दच० ।

**हली(म)सक** पु० पाण्डुरोगभेदे “यदा तु पाण्डोर्वर्णः स्याद्धरित श्यावपीतकः । बलोत्साहः क्षयस्तन्द्रामन्दाग्नित्वं मृदुज्वरः । स्त्रीष्वहर्षोऽङ्गमर्दश्च श्वासतृष्णारुचिभ्रमाः । हली(म)सकं तदा तस्य विद्यादनिलपित्ततः” भावप्र० ।

**हलीशा** स्त्री हलस्य ईशा शक० । लाङ्गलदण्डे ।

**हल्य** त्रि० हलं हलकर्षणमर्हति तस्येदं वा यत् । १हलकर्षणयोग्ये क्षेत्रादौ अमरः । २हलसम्बन्धिनि च । हलानां समूहः यत् । ३हलसमूहे स्त्री अमरः । [अहल्लीत् ।

**हल्ल** विकाशे भ्वा० पर० अक० सेट् भानुदीक्षितः । हल्लति

**हल्लक** न० हल्ल-ण्वुल् भानुदीक्षितः । हल-सम्प० भावे क्विप् हलं लाति ला-क । संज्ञायां कन् वा । रक्तकह्लारे (हेला) अमरः ।

**हल्लीष** न० हल-क्विप् लष-अच् पृषो० कर्म० । स्त्रीणां मण्डलिकाकारनृत्ये । ततः स्वार्थे क । तत्रैव । “मण्डलेन तु यन्नृत्यं स्त्रीणां हल्लीषकन्तु तत्” हेमच०